## संस्कृतबालादर्शे सप्तदशः पाठः ॥ १७ ॥

# विद्यालयः

**आहत्य । कति । प्रश्नः । कक्ष्या ।**

अस्मिन् विद्यालये चतस्रः कक्ष्याः सन्ति । एते सप्त छात्राः चतुर्थकक्ष्यायां पठन्ति । चित्रं पश्य । एको बालकः तिष्ठति । अनन्ये उपविष्टाः (*p.p.* are sitting) । तिष्टन् बालकः उपाध्यास्य प्रश्नाम् उत्तराणि कथयति ॥

त्वं कस्यां कक्ष्यायां पठसिद्य? अहं तृतीयकक्ष्यायां पठामि । कति छात्राः त्वया सह पठन्ति ? मया सह चत्वारो बालकाः तिस्रो बालिकाश्च पठन्ति । आहत्य वयं अष्टौ सहपाठिनः स्मः । द्वितीय कक्ष्यायां द्वे बालिके त्रयो बालकाश्च पठन्ति । प्रथम कक्ष्यायां पञ्च बालकाः पञ्च बालिकाश्च सन्ति ॥

**क ) प्रश्नाः - -**

१ । अमिन् विद्यालये कति कक्ष्याः सन्ति ?

अस्मिन् विद्यालये चतस्रः कक्ष्याः सन्ति ।

२. एते सप्त छात्राः कस्यां कक्ष्यायां पठन्ति ?

एते सप्त छात्राः चतुर्थकक्ष्यायां पठन्ति ।

३ । तिष्ठन् बालकः किं करोति ?

तिष्ठन् बालकः उपाध्यायस्य प्रश्नान् उत्तराणि कथयति ।

४। तृतीय कक्ष्यायां के के सन्ति ?

तृतीय कक्ष्यायां पञ्च बालकाः तिस्रो बालिकाः पठन्ति।

५। आहत्य यूयं कति सहपाठिनः स्थ ?

आहत्य वयं अष्टौ सहपाठिनः स्मः।

६। प्रथम कक्ष्यायां कति बालकाः कति बालिकाश्च सन्ति ?

प्रथमकक्ष्यायां पञ्च बालकाः पञ्च बालिकाश्च सन्ति।

**ख) Note the combinations of the words - -**

1. एकः + बालकः = एको बालकः
2. चत्वारः + बालकाः + चत्वारो बालकाः
3. तिस्रः + बालिकाः + तिस्रो बालिकाः

**ग ) ' किम् ' शब्दस्य रूपैः यथा योगं वाक्यानि पूरयत - -**

| | |
|---|---|
| १। ____ एतत् ? | किम् एतत् ? |
| २। ____ अयम् ? | कः अयम् ? |
| ३। ____ इदम् ? | किम् इदम् ? |
| ४। त्वं ____ श्लोकं पठसि ? | त्वं कं श्लोकं पठसि ? |
| ५। इदं ____ बालकस्य पुस्तकम्। | इदं कस्य बालकस्य पुस्तकम् ? |
| ६। त्वं ____ ग्रामे वससि। | त्वं कस्मिन् ग्रामे वससि ? |

**घ) सङ्ख्याशब्दाः रूपाणि - -**

| सङ्ख्या | पुंसि | स्त्रियां | नपुंसके |
|---|---|---|---|
| १ | एकः | एका | एकम् |
| २ | द्वौ | द्वे | द्वे |
| ३ | त्रयः | तिस्रः | त्रीणि |
| ४ | चत्वारः | चतस्रः | चत्वारि |

<u>शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary</u>

विद्यालयः *m* school

आहत्य *in* on the whole

कति how many (all genders)

कक्ष्याः *f* classes

उपविष्टः *m* sitting

उत्तरणि *n* answers

चित्रं *n* picture

सहपाठिनः *m* classmates